# Dashamaskandhamukhyarthagitih

# दशमस्कन्धमुख्यार्थगीतिः

## Document Information

Text title : Dashamaskandhamukhyarthagitih

File name : dashamaskandhamukhyArthagItiH.itx

Category : vishhnu, vishnu, moropanta, krishna

Location : doc_vishhnu

Author : Mayurakavi or Moropanta

Proofread by : Rajesh Thyagarajan

Description/comments : Stotras composed by Moropanta mayUrakavi

Latest update : December 23, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 23, 2023

*sanskritdocuments.org*

# दशमस्कन्धमुख्यार्थगीतिः

(पञ्झटिकाच्छन्दः)
सच्चित्सुखमूर्तिर्विधितातः श्रीदेवककन्योदरजातः ।
नन्दयशोदापुत्रीभूतः पीतबकीप्राणोऽप्यतिपूतः ॥ १॥

क्षिप्तपदाब्जविचूर्णितशकटः साधुषु चरितैः सुतरां प्रकटः ।
लीलालवनिहततृणावर्तः शरणं विदुषां खलसंवर्तः ॥ २॥

स्तनपाने मुखदर्शितलोकः शिशुचरितामृतहतभवशोकः ।
यो गोपीनवनीतस्तेनः सुखयति यशसि मनःशस्ते नः ॥ ३॥

स (१)मृदोऽदर्शयदशने मात्रे वदने विश्वं कम्पं गात्रे ।
बद्ध उलूखल भागसि दाम्ना बहवो मुक्तिमिता यन्नाम्ना ॥ ४॥

बद्धेनापि कृतावलममलौ धनपतितनयावगमौ(२) यमलो ।
वत्सबकाद्यसुरखलकालः पद्मजमोहनगोव्रजबालः ॥ ५॥

धेनुककालियमर्दनदक्षः सुयशःप्रमुदितसज्जनलक्षः ।
बलमुद्बोध्य प्रलम्बो नीतः प्रलयं येन ज्वलनः पीतः ॥ ६॥

गोपकुमारीजनपटचौरः कान्त्या श्यामो यशसा गौरः ।
हतमाथुरविप्रस्त्रीमोहः प्रणताखिलजनसुखसन्दोहः ॥ ७॥

लीलोद्धृतगोवर्धनगोत्रः शक्रमदहरः पुण्यस्तोत्रः ।
यस्मान्मुक्तो वरुणानन्दः प्राप्तः स्त्रीभी रासानन्दः ॥ ८॥

नन्दमजगरान्मुनिशापात्तं यो मोचितवानतितापात् तं ।
गोपीहरदरचूडारातिः स्त्रीजनवर्णितवेणुख्यातिः ॥ ९॥

लीलालेशध्वस्तारिष्टः केशिवधानन्दितबहुशिष्टः ।
गुणरञ्जितनारदमुनिपालः शिशुदस्युव्योमासुरकालः ॥ १०॥

दुर्लभदर्शनसुखिताक्रूरः सन्निहितोप्यभवद् व्रजदूरः ।

यत्र घने खलकलशो न्युब्जः (३)पाटीरार्पणतारितकुब्जः ॥ ११॥

नाशितमाथुरजनहृत्पीडः क्रीडानिहतकुवलयापीडः ।
भुजसमरप्रमथितखलमल्लः स्मितरसभरपरिशोभितगल्लः ॥ १२॥

रणवेलाहेलाहतकंसः (४)सात्वतमानसहंसवतंसः ।
(५)सदनुग्रहगुरुकुलजनितनयः प्रोज्जीवितसान्दीपनितनयः ॥ १३॥

उद्धवमुखहतगोपीतापः कुब्जारतिवरदकुसुमचापः ।
आश्रितदानपतिप्रियकर्ता पितृभगिनीचिन्ताज्वरहर्ता ॥ १४॥

असकृत्कृतमागधबलविलयः सागररचितात्यद्भुतनिलयः ।
कालयवनमतिवञ्चनदक्षः कृतमुचुकुन्दक्षितिपतिरक्षः ॥ १५॥

मगधमहीपतिकैतवभीतः रैवतजादेवर इति गीतः ।
भीष्मककन्या राक्षसविधिना येन हृता करुणामृतनिधिना ॥ १६॥

रुक्मिण्यामुत्पादितकामः स्वीकृतजाम्बवतीमणिभामः ।
कालिन्दीं मित्रोत्तरविन्दां हृतवान् सत्यामपि गतनिन्दाम् ॥ १७॥

भद्राजानिर्माद्रीभर्ता द्व्यष्टसहस्रस्त्रीप्रियकर्ता ।
वैदर्भीचेतोहरनर्मा अनुमतरुक्मिवधाग्रजकर्मा ॥ १८॥

प्रेमभरसमरनिर्जितशर्वः शाततिबाणासुरभुजगर्वः ।
नृगनृपसद्गतिवितरणवित्तः कृष्टतरणिजागोपीचित्तः ॥ १९॥

पौण्ड्रककालः कृत्याशमनः क्रूरद्विविदमहाकपिदमनः ।
हललीलोन्मूलितनागपुरः सुरमुनिमोहकरचरितचतुरः ॥ २०॥

मागधनृपवधविस्मितवैद्यः क्षतसाध्वपचित्यसहनचैद्यः ।
धर्ममखाहृतभूसुरदास्यः कुर्वधमस्खलितोदितहास्यः ॥ २१॥

शाल्वघ्नो (६)दन्ताद्वक्रघ्नः पापेल्वलहतविप्रोपघ्नः ।
श्रीमद्धर्मनरेश्वरदूतः क्षितिभरखलवधपरनरसूतः ॥ २२॥

श्रीदामद्विजदारिद्र्यहरः स्वविरहमग्नसुहृद्दत्तकरः ।
सुतदर्शनहृतमातृक्लेशः स्वसृहरणानुमतगुडाकेशः ॥ २३॥

उद्धृतबहुलाश्वश्रुतदेवः पापिवृकत्रातमहादेवः ।
भृगुगीतातुलशान्तिसुशीलः भूसुरसुतानयनाद्भुतलीलः ॥ २४॥

भक्तमयूरदयामृतजलदः सततस्वचारितवर्णनबलदः ।
तमहं वन्दे खगपतिकेतुं सुखहेतुं भवसागरसेतुम् ॥ २५॥

अनुपदमेतद् ध्रुवपदमुदितं वितरतु रसिकाननुपममुदितम् ।
(अनुष्टुपच्छन्दः)
दशमस्कन्धमुख्यार्थगीतिरेषाऽघहारिणी ।
सम्पूर्णा यादवेशानकृष्णसन्तोपकारिणी ॥ २६॥

इति मयूरकवीश्वरविरचिता दशमस्कन्धमुख्यार्थगीतिः समाप्ता ।

टिप्पणि

१। मृदः अशने भक्षणे मात्रे यशोदायै वदने विश्वं गात्रे च कम्पमदर्शयदित्यन्वयः ।

२। अगमौ वृक्षौ यमलार्जुनौ ।

३। पारिश्चन्दनम् ।

४। सात्वतोऽकरस्तस्य मानसं तस्यालङ्कृतिहंसः ।

५। मदनुग्रहाय लोकसङ्ग्रहाय गुरुकुले जनितः अधीतः नयो नीतिशास्त्रं येन तादृशः ।

६। दन्ताद्वक्रो वक्रदन्तः ।

Proofread by Rajesh Thyagarajan

*Dashamaskandhamukhyarthagitih*

pdf was typeset on December 23, 2023

Please send corrections to *sanskrit@cheerful.com*